॥ श्रीगुरुभ्यो नमः॥

॥ ॐ श्रीमहागणाधिपतये नमः ॥

==========================================================

**From Srimad Bhagavatham: 12th Canto - 6th Chapter:**

==========================================================

ॐ श्रीगणेशाय नमः॥ ॐ नमो भगवते आदित्यायाखिलजगतां आत्मस्वरूपेण कालस्वरूपेण चतुर्विधभूत-निकायानां ब्रह्मादिस्तम्भ-पर्यन्तानां अन्तर्हृदयेषु बहिरपि चाकाश इव उपाधिनाऽव्यवधीयमानो भवानेक एव क्षणलव-निमेषावयवोपचित-संवत्सरगणेन अपा-मादान-विसर्गाभ्यां इमां लोकयात्रां अनुवहति ॥ (1)

यदुह वाव विबुधर्षभ सवितरदस्तपत्यनुसवनं अहरहः आम्नायविधिना उपतिष्ठमानानां अखिल-दुरित-वृजिनबीजावभर्जन भगवतः समभिधीमहि तपनमण्डलम् ॥ (2)

य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मनइन्द्रियासुगणान् अनात्मनः स्वयमात्मा अन्तर्यामी प्रचोदयति ॥ (3)

य एवेमं लोकं अतिकराल-वदनान्धकार-संज्ञा-जगरग्रह-गिलितं मृतकमिव विचेतनं अवलोक्य अनुकम्पया परमकारुणिकः ईक्षयैव उत्थाप्य अहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्तयति अवनिपतिरिव असाधूनां भयमुदीरयन्नटति ॥ (4)

परित आशापालैः तत्र तत्र कमलकोशाञ्जलिभिः उपहृतार्हणः ॥ (5)

अथह भगवन् तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वन्दितं अहं अयातयामयजुःकामः उपसरामीति ॥ (6)

एवं स्तुतः स भगवान् वाजिरूपधरो हरिः ।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ॥ (7)

॥ इति श्रीमद्भागवते द्वादशस्कन्धे श्रीयाज्ञवल्क्यकृतं श्रीसूर्यस्तोत्रं संपूर्णम् ॥

Note: This Stuti appears in the 12th Skandham of Srimad Bhaagavatham. Maharishi Yagnavalkya praised Sree Surya Bhagavan through this Stuti, to earn his grace and for obtaining the till-then-unknown Sukla Yajurveda Mantras or Ayaata-Yaamam, as mentioned in Sastras. This Stuti eloquently describes how Surya Bhagavan single-handedly protects this entire Cosmos by his never-ending Loka Yatra and the Vedic religion and Bhagavan’s unfailing grace to those performing the Vedic daily rituals.